चित्रगुः नीलोत्पलमित्यादौ सर्व्वत्रान्वयप्रसङ्गः। राजपदादेः सम्बन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात् पुरुषादेस्तथात्वाभावात्। तण्डुलः शुक्ल इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः। शुक्लेन तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्ष्णिकोवान्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः। किञ्च राजपुरुषइत्यादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्यः राज्ञः पुरुष इति विवरणविरोधात् समानार्थकवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णयोन स्यात् नान्त्यः राजसम्बन्धरूपः पुरुष इति बोधप्रसङ्गात् विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे। अतएव "वषट्कर्त्तुः प्रथमभक्षः" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति तृतीये, "अङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन न त्रित्वविधानं युक्तम् एकप्रसरत्वभङ्गापत्तेरिति दशमे च निरूपितं सङ्गच्छते। सङ्गच्छते चारुण्याधिकरणारम्भः। अन्यथा "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यत्रारुण्यपदवदितरयोरपि एकत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया असम्भवादिति प्रपञ्चितं भूषणे। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः"।

**आख्यात** त्रि० आ+ख्या—कर्मणि क्त। १कथिते। आख्यायतेऽनेन बा० करणे क्त। तिङ्रूपे प्रत्यये तल्लक्षणमाह शब्दश० "धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने। समर्थः स्वार्थयत्नस्य शब्दोवाख्यातमुच्यते" इति। व्याख्यातं चैतत् स्वेनैव "धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दो वाख्यातं तदेव च तिङ् इत्यर्थाल्लभ्यते तिङाख्यातयोः पर्य्यायत्वात्। पाकश्चैत्रस्येत्यादौ नामार्थेनैव विशिष्टस्वार्थकर्तृत्वस्याभिधायकः षष्ठ्यादिको न तु धात्वर्थेन विशिष्टस्य। चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नस्य यत्नस्य विधेयतया बोधकावपि नामधातू न स्वार्थस्य। चैत्रः पाचक इत्यादौ तु धात्वर्थविशेषितस्य यत्नस्य न विधेयता किन्तु कर्त्तुरेव कृतां धर्म्मिशक्तत्वात् अन्यथा पाचकश्चैत्र इत्यादिकस्य योग्यमेव प्रातिपदिकार्थयोः पाचकचैत्रयोर्भेदेनान्वयस्याव्युत्पन्नतया कृदर्थकृतेश्चैत्रादावन्वयायोगाच्च। अयं पक्तुं कालइत्यादौ तुमादिना धात्वर्थावच्छिन्नोऽनुकूलत्वादिः, इयं चिकीर्षेत्यादौ च सनादिनेच्छादिरेव विधेयत्वेनानुभाव्यते इति न तेष्वतिप्रसङ्गः। अत्रेदं तत्त्वम्। जीवनयोन्यादिनिखिलयत्नगतं यत्नत्वमेव तिङः शक्यतावच्छेदकं न तु चेष्टाया जनकत्वस्य चिकीर्षाया वा जन्यत्वस्यावच्छेदकतया सिद्धं प्रवृत्तित्वम्। चैत्रोनिश्वसितीत्यादितोऽपि श्वासाद्यनुकूलप्रयत्नस्य प्रतीतेः। तिङर्थकृतौ च धात्वर्थस्य तं करोमीतिप्रतीतिनियामकः साध्यत्वाख्यविषयताप्रभेदस्तद्विशिष्टफलोपधायकत्वलक्षणमनुकूलत्वं वा संसर्गमर्य्यादया भासते तथैव साकाङ्क्षादतोगत्यादिगोचरनिवृत्तिदशायां गच्छतीत्यादिको न प्रयोगः। "तत्र निश्वासवत्त्वमात्रप्रतीतावपि प्रयत्नत्वमेव तिङः शक्यतावच्छेदकं न तु प्रवृत्तित्वं पचतीत्यतः पाककृतिमानिति प्रतीतेः नहि प्रवृत्तित्वमेव कृतित्वं पाके प्रवृत्तोऽस्मीत्यस्याप्यनुभवस्य पाकं करोमीत्यतोविषयवैलक्षण्यस्य सर्वसिद्धत्वात् नित्यकृतौ रागप्रयोज्यस्य प्रवृत्तित्वस्य बाधादीश्वरः करोतीत्यादिवाक्यस्यायोग्यतापाताच्च। निविड़निखातस्तु पुरुषः समुत्थानगोचरप्रयत्नवानपि न तदुपधायकप्रयत्नवान् अतस्तत्रायमुत्तिष्ठतीत्यादिकोन प्रयोगः नचैवमीश्वरः पचतीत्यपि स्यात् तस्यापि पाकानुकूलप्रयत्नवत्त्वादिति वाच्यं तिङर्थकृतेरवच्छेदकत्वेनैव संसर्गेण नामार्थान्वयस्य व्युत्पन्नत्वादङ्गुलौ पचतीत्यादिप्रयोगस्येष्टत्वात् अन्त्यावयविनिष्ठावच्छेदकत्वस्यैव तादृशतिङर्थकृतेः संसर्गत्वे क्षत्यभावाच्च। नित्यप्रयत्नव्यावृत्तस्यैवानुकूलत्वविशेषस्य तिङर्थकृतौ धात्वर्थस्य संसर्गत्वमित्यप्याहुः"। ईश्वरो जानातीच्छति रथोगच्छतीत्यादौ च ज्ञानादिमत्त्वमात्रप्रतीतेः समवायित्वे, चैत्रोजानातीत्यादाववच्छेदकत्वे, बुद्धिरवगाहते घटोभासत इत्यादौ दैशिकाश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे, तिङोनिरूढ़लक्षणा। कृतित्ववदाश्रयत्वादेरखण्डत्वे तदवच्छिन्नेऽपि ज्ञानेच्छादेरपि तिङः शक्तिरेव। हस्तादिकस्त्ववयवः प्रयत्नस्यैवावच्छेदको न तु ज्ञानेच्छादेरपि प्रमाणाभावादतः करोजानातीत्यादिको न प्रयोगः। प्रागुक्तैव वा रीतिरत्रापि। पयः पतति स्यन्दते इत्यादावपि पतनादेः समवायित्वमेव तिङानुभाव्यते न तु तदनुकूलं गुरुत्वद्रवत्वादि येन कृतितुल्यशरीरेषु तेष्वपि तिङः शक्तिरापाद्यते। पटानां शतं पततीत्यादौ च शतपदार्थस्यैकदेशएव शतत्वसंख्यायां